बह्वीभ्यो देहि। अल्पाभ्यो देहि। बहुशो देहि। अल्पशो देहि।

[७३०] त्वतलोर्गुणवचनस्य पुंवद्भावो वक्तव्यः। (म.भा. ३.१५५)

पट्व्याः भावः पटुत्वम्, पटुता। गुणवचनस्य इति किम्? कठ्याः भावः कठीत्वम्, कठीता।

[७३१] भस्याढे तद्धिते पुंवद्भावो वक्तव्यः। (म.भा. ३.१५५)

हस्तिनीनां समूहो हास्तिकम्। अढे इति किम्? श्यैनेयः। रौहिणेयः। कथम् आग्नायी देवता अस्य आग्नेयः स्थालीपाकः इति? कर्तव्योऽत्र यत्नः।

[७३२] ठक्छसोश्च पुंवद्भावो वक्तव्यः। (म.भा. ३.१५५)

भवत्याः छात्राः भावत्काः। भवदीयाः॥

## क्यङ्मानिनोश्च। (३६/८३७)

क्यङि परतो मानिनि च स्त्रिया भाषितपुंस्काद[1]नूङ् पुंवत् भवति। एनी – एतायते। श्येनी–श्येतायते। मानिनि – दर्शनीयमानी अयमस्याः। दर्शनीयमानिनी इयमस्याः। [2]मानिनो ग्रहणमस्त्र्यर्थम् असमानाधिकरणार्थं च। इह तु दर्शनीयामात्मानं मन्यते [3]दर्शनीयमानिनी इति पूर्वेणैव सिद्धम्॥

## न कोपधायाः। (३७/८३८)

[4]कोपधायाः स्त्रियाः पुंवद्भावो न भवति। [5]पाचिकाभार्यः[6]। कारिकाभार्यः। मद्रिकाभार्यः। वृजिकाभार्यः। मद्रिकाकल्पा। [4]वृजिकाकल्पा। मद्रिकायते। वृजिकायते। मद्रिकामानिनी। वृजिकामानिनी। वेलिपिकायाः धर्म्यं वैलेपिकम् (म.भा. ३.१५६)।

[७३३] कोपधप्रतिषेधे तद्धितवुग्रहणं कर्तव्यम्। (म.भा. ३.१५६)

इह मा भूत्, पाकभार्यः, भेकभार्यः इति॥

## सञ्ज्ञापूरण्योश्च। (३८/८३९)

सञ्ज्ञायाः पूरण्याश्च स्त्रियाः पुंवद्भावो न भवति। दत्ताभार्यः। गुप्ताभार्यः। दत्तापाशा। गुप्तापाशा। दत्तायते। गुप्तायते। दत्तामानिनी। गुप्तामानिनी। पूरण्याः – पञ्चमीभार्यः। दशमीभार्यः। पञ्चमीपाशा। दशमीपाशा। पञ्चमीयते। दशमीयते। पञ्चमीमानिनी। दशमीमानिनी॥

---

1. अनूङः क. 2. मनिन्ग्रहणम् ह. 3. देवदत्ता यज्ञदत्तायाः इत्यधिकम् फ 4. ककारोपधायाः ब. 5. पाचिकाभार्यस्य ब. 6. रसिकाभार्यः इत्यधिकम् ब.क. 7. वृजिकाकल्पा नास्ति ब. क.